2019

M.A.

4th Semester Examination

# SANSKRIT

Paper : SAN-403

Group : A & B

Full Marks : 40 Time : 2 Hours

*The figures in the margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable. Illustrate the answers wherever necessary.*

## Group - A

सर्वे प्रश्नाः संस्कृतेनैव समाधेयाः

1. एकः प्रश्नः समाधेयः 10

(a) 'मृच्छकटिकम्' इति प्रकरणस्य नामकरणं यथार्थं न वेति विचार्यताम्।

(b) मृच्छकटिकस्य पठितांशमवलम्ब्य चारुदत्तस्य चरितं वर्ण्यताम्।

[ Turn Over ]

2. प्रश्नत्रयं समाधेयम् — 1×3

(a) मृच्छकटिकस्य नान्दीश्लोके कस्य स्तुतिर्विहिता?

(b) 'सर्वं शून्यं दरिद्रस्य' - कस्योक्तिरियम्? कस्मिन् प्रसङ्गे?

(c) चारुदत्तस्य सेविका कासीत्?

(d) दारिद्र्यमरणयोर्मध्ये चारुदत्ताय किं रोचते? कथं वा?

(e) 'रत्नं रत्नेन सङ्गच्छते' - कुत्र प्राप्यते? कस्योक्तिः इयम्?

3. एकः प्रश्नः समाधेयः 10

(a) मुद्राराक्षसनाटके प्रतिफलिता राजनीतिः संक्षेपेण आलोच्यताम्।

(b) मुद्राराक्षसमवलम्ब्य राक्षसचरितमुपवर्ण्यताम्।

4. प्रश्नत्रयं समाधेयम् : 1×3

(a) मुद्राराक्षसनाटकस्य अङ्गी रसः कः?

(b) चाणक्येन मौर्यलक्ष्मीः सरसि नलिनीव कथं स्थिरपदा कृता?

(c) मुद्राराक्षसम् इति पदे का तावत् व्युत्पत्तिः ?

(d) 'ते भृत्या नृपतेः कलत्रमितरे सम्पत्सु चापत्सु च' – इति कं प्रति कस्योक्तिः ?

(e) 'धन्या केयं स्थिता ते शिरसि' – इत्यादिश्लोके कोऽलङ्कारः, किं च छन्दः ?

5. एकः प्रश्नः समाधेय : 10

(a) जगन्नाथानुसारं काव्यप्रयोजनानि आलोच्यन्ताम्।

(b) काव्यलक्षणं रसगङ्गाधरग्रन्थानुसारं व्याख्यायताम्।

6. चत्वारः प्रश्नाः समाधेयाः 1×4

(i) जगन्नाथस्य क्लेशो कथं गतार्थो भविता ?

(ii) रसगङ्गाधरग्रन्थस्य स्वतन्त्रं वैशिष्ट्यद्वयं लिख्यताम्।

(iii) जगन्नाथमते काव्यकारणं किम् ?

(iv) रसगङ्गाधरमते प्रतिभायाः को हेतुः ?

(v) जगन्नाथमते मध्यमकाव्यलक्षणं किम् ?

(vi) अधमाधमं पञ्चमं काव्यं कथं न भवेत् ?

*[ Turn Over ]*

## Group - B

सर्वे प्रश्नाः संस्कृतेन देवनागर्या च समाधेयाः

1. (a) न्यायमते कतिविधं प्रमाणम्? तत्र प्रत्यक्षलक्षणं किम्? सूत्रकारेण प्रत्यक्षस्य यत् लक्षणमुक्तं तत् प्रत्यक्षप्रमाणस्य उत प्रत्यक्षप्रमायाः लक्षणम्? प्रतिपद-व्यावृत्तिपुरःसरं प्रत्यक्षलक्षणं विचार्यताम्। 10

*अथवा*

(b) संशयादीनां पदार्थानां यथासम्भवं प्रमाणेषु प्रमेयेषु चान्तर्भावेऽपि कथं तेषां पृथगुल्लेखः विशद्यताम्।

2. (a) 'वह्निमान् धूमात्' - इति सद्धेतुस्थले व्याप्तेः पूर्वलक्षणं संगतमसंगतं वा आशङ्कोल्लेखपुरःसरं विचार्यताम्। 10

*अथवा*

(b) व्याप्तेः सिद्धान्तलक्षणं किम्? तत् लक्षणं निरूप्य सदसद्धेतुस्थलयोः तस्य सङ्गतिरसङ्गतिर्वेति विचार्यताम्।

3. (a) प्रमाणैरर्थपरीक्षणं न्यायः - व्याख्यायताम्। 7

*अथवा*

"भिद्यमानस्य प्रत्यक्षज्ञानस्य नायं भिद्यते-इति समानत्वान्नोक्तः" - इति भाष्यवचनं व्याख्यायताम्।

(b) द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वात् - इति सद्धेतुस्थले व्याप्तेः लक्षणसमन्वयः कथं सम्भवति? प्रदर्श्यताम्। 7

*अथवा*

"सत्तावान् जातेः - इत्यत्र लक्षणसमन्वयः व्याख्यायताम्।

4. यथेच्छं प्रश्नत्रितयस्योत्तरं देयम् : 2×3

(a) न्यायमते आप्तः कः?

(b) निःश्रेयसशब्दस्य कोऽर्थः?

(c) वितण्डा सप्रयोजना उत अप्रयोजना?

(d) धूमावयवे धूमः केन सम्बन्धेन वर्तते?

*[ Turn Over ]*

(e) 'पर्वतो वह्निमान् धूमात्' - इत्यत्र साध्यं तदधिकरणे कस्मिन् सम्बन्धे विद्यते? तेनैव सम्बन्धेन किं साध्यवान् अपि ग्रहणीयः?

---